पुरातत्विहास

Question Booklet No. 00001

# 11P/269/1

*(To be filled up by the candidate by blue/black ball-point pen)*

Roll No. | | | | | | | | |

Roll No. (Write the digits in words) ....................................................................................

Serial No. of Answer Sheet ..............................................

Day and Date .............................................................. ............................................ ( Signature of Invigilator )

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall ***except the Admit Card without its envelope.***
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space prvided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Queston Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more than one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR** ***Answer Sheet*** at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages :24** *[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए हैं।]*

# 11P/269/1

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** | ***Full Marks : 450***

***समय : 2 घण्टे*** | ***पूर्णाङ्क : 450***

**Note :** (1) Attempt as many questions as you can. Each question carries **3 (Three)** marks. ***One mark will be deducted for each incorrect answer***. Zero mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3 ( तीन )** अंक का है। ***प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।*** प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक ***शून्य*** होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**1.** श्रीमद्भागवतमहापुराणस्य मङ्गलपद्यं कीदृशमस्ति?

(1) आशीर्वादात्मकम्  (2) नमस्कारात्मकम्

(3) ध्यानात्मकम्  (4) विज्ञानात्मकम्

**2.** 'जन्माद्यस्य' इत्यस्मिन्पदे 'अस्य' इति पदस्य कोऽर्थः?

(1) ईश्वरः  (2) जगत्  (3) शुकः  (4) भागवतम्

**3.** कस्मिन्विषये सूरयो मुह्यन्ति?

(1) परमात्मविषये  (2) वेदविषये

(3) जगद्विषये  (4) भागवतपुराणविषये

**4.** अत्र भागवते कीदृशो धर्मः प्रोक्तः?

(1) प्रोज्झितवैभवः (2) प्रोज्झितकर्मकाण्डकः

(3) प्रोज्झितधनः (4) प्रोज्झितकैतवः

**5.** श्रीमद्भागवतस्य किं वस्तु तापत्रयोन्मूलनमस्ति?

(1) वेद्यम् (2) गेयम् (3) नेयम् (4) प्रेयम्

**6.** श्रीमद्भागवतं कस्य कल्पतरोर्गलितं फलम्?

(1) विबुधकल्पतरोः (2) विविधकल्पतरोः

(3) निगमकल्पतरोः (4) सुगमकल्पतरोः

**7.** मुनयः कं सत्कृतमादरात् पप्रच्छुः?

(1) अवधूतं (2) सूतं (3) प्रभूतं (4) जीमूतम्

**8.** शृण्वतां रसज्ञानां किं पदे पदे स्वादु ?

(1) उत्तमश्लोकविक्रमः (2) मध्यमलोकविक्रमः

(3) त्रिविक्रमः (4) मङ्गलोपक्रमः

**9.** कया आत्मा प्रसीदति?

(1) उपासनया (2) क्रतुक्रियया (3) शक्त्या (4) भक्त्या

**10.** पादपूर्त्तिर्विधेया--

वदन्ति तत्तत्त्वविदस्तत्त्वं......................।

(1) यद्भौतिकं जगुः (2) नैय्यायिकैर्मतम्

(3) यज्ज्ञानमद्वयम् (4) तत्त्वनिरूपणम्

**11.** भागवते का सदसद्रूपेति निरूपिता--

(1) बुद्धिः (2) शुद्धिः (3) माया (4) छाया

12. 'गजाह्वयम्' इति कस्य नगरस्य अपरं नाम?
(1) द्वारकानगरस्य (2) इन्द्रप्रस्थस्य (3) हस्तिनापुरस्य (4) कुरुक्षेत्रस्य

13. कस्य विषये इयमुक्ति:--
कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभि:।
आत्मन्यात्मानमावेश्य सोऽन्त:श्वास उपारमत्॥
(1) धृतराष्ट्रस्यविषये (2) भीष्मस्य विषये
(3) नरोत्तमस्य विषये (4) विदुरस्य विषये

14. अजातशत्रुरिति कस्य अपरं नाम?
(1) भीष्मस्य (2) युधिष्ठिरस्य (3) श्रीकृष्णस्य (4) अर्जुनस्य

15. गावल्गणिरिति कस्य अपरं नाम?
(1) विदुरस्य (2) अधिरथस्य (3) सञ्जयस्य (4) धृतराष्ट्रस्य

16. वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा।
येन मेऽपहृतं तेजो देवविस्मापनं महत्॥
इति कं प्रति कस्योक्ति:?
(1) अर्जुनं प्रति युधिष्ठिरस्य (2) युधिष्ठिरं प्रत्यर्जुनस्य
(3) विदुरं प्रत्यर्जुनस्य (4) अर्जुनं प्रति विदुरस्य

17. धर्मस्य वृषरूपधरस्य के चत्वार: पादा: कृतयुगे कृता:?
(1) सत्यशौचदयाक्षान्तिरूपा: (2) त्यागसन्तोषशमार्जवरूपा:
(3) तप:साम्यतितिक्षोपरतिरूपा: (4) तप:शौचदयासत्यरूपा:

18. अभ्यर्थित: परीक्षित् प्रथमं कानि चत्वाआरिस्थानानि कलये ददौ?
(1) मुक्तामाणिक्यरूप्यताम्ररूपाणि
(2) भूर्लोकभुवर्लोकस्वर्लोकपाताललोकरूपाणि
(3) द्यूतसुरापानव्यभिचारहिंसारूपाणि
(4) गायनवादननर्त्तननाट्यरूपाणि

**19.** कः खगेन्द्रध्वजः?

(1) अर्जुनः (2) विष्णुः (3) कर्णः (4) गरुडः

**20.** कः द्रौण्यस्त्रविप्लुष्टो मातुरुदरे न मृतः?

(1) भीष्मः (2) अभिमन्युः (3) परीक्षित् (4) कृपः

**21.** श्रीमद्भागवतस्य प्रथमे स्कन्धे कस्मिन्नध्याये इयं फलश्रुतिः?

यः श्रद्धयैद्भगवत्प्रियाणां पाण्डोः सुतानामिति सम्प्रयाणम्।

शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैतिसिद्धिम्॥

(1) पञ्चमेऽध्याये (2) दशमेऽध्याये

(3) पञ्चदशेऽध्याये (4) एकोऽनविंशेऽध्याये

**22.** परीक्षिता को गुरुः कृतः?

(1) धौम्यः (2) शाण्डिल्यः (3) शारद्वत् (4) गर्गः

**23.** काऽऽसीत् इरावती?

(1) उत्तरस्य तनया (2) द्रुपदस्य तनया

(3) वृषध्वजस्य तनया (4) कृतध्वजस्य तनया

**24.** परीक्षिद् गङ्गातटे कांस्त्रीन् क्रतून् आजहार?

(1) वाजपेयान् (2) राजसूयान् (3) अश्वमेधान् (4) बृहस्पतिसवान्

**25.** को वीरः कलिं दिग्विजये निजग्राह?

(1) पाण्डुः (2) युधिष्ठिरः (3) अर्जुनः (4) परीक्षित्

**26.** परीक्षिन्नामराजर्षेःरथः कीदृश आसीत्?

(1) गरुडध्वजः (2) मयूरध्वजः (3) कपिध्वजः (4) मृगेन्द्रध्वजः

**27.** "आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कञ्चनाम्ब" इति कस्योक्तिः कामुद्दिश्य?

(1) ज्ञानस्योक्तिः भक्तिं प्रति (2) वैराग्यस्योक्तिः मुक्तिं प्रति
(3) धर्मस्योक्तिः पृथ्वीं प्रति (4) कर्मण उक्तिं क्रियां प्रति

**28.** पादपूर्तिर्विधेया--

....................येन विकर्शिताऽसि।

(1) प्रियंवदे (2) मनःप्रिये (3) वसुन्धरे (4) सुभद्रिके

**29.** परीक्षितं प्रति को वाग्वज्रं विससर्ज?

(1) ऋषिः (2) ऋषिबालकः (3) कलिः (4) कल्माषपादः

**30.** वर्णाश्रमाचारयुतस्त्रयीमयः आर्यधर्मः कदा विलीयते?

(1) अराजके जनपदे (2) भूरिराजके जनपदे
(3) कुटिलपदे (4) दंशितश्वापदे

**31.** 'भगवान् सर्वात्मा क्षन्तुमर्हति' इति कस्योक्तिः?

(1) परीक्षितः (2) कलेः (3) आङ्गिरसस्य (4) भारद्वाजस्य

**32.** श्रीमद्भागवतस्य प्रथमे स्कन्धे कति सन्त्यध्यायाः?

(1) सप्तदश (2) अष्टादश (3) एकोनविंशतिः (4) विंशतिः

**33.** अस्मिन्कल्पे कति मनवो व्यपगताः?

(1) द्वौ (2) पञ्च (3) षट् (4) सप्त

**34.** का आसीत् स्वायम्भुवस्य मनोर्धर्मपत्नी?

(1) शताङ्कुरा (2) शतप्रज्ञा (3) शतरूपा (4) शताङ्कुारा

**35.** कस्मिन्मन्वन्तरे रोचननामा इन्द्र आसीत्?

(1) स्वायम्भुवमन्वन्तरे (2) स्वारोचिषमन्वन्तरे
(3) चाक्षुषमन्वन्तरे (4) तामसमन्वन्तरे

**36.** उत्तमो मनु: कस्य पुत्र आसीत्?
(1) प्रियव्रतस्य (2) देवव्रतस्य (3) यज्ञव्रतस्य (4) धर्मव्रतस्य

**37.** सत्यसेन: क आसीत्?
(1) इन्द्र: (2) राजा (3) मनु: (4) भगवदवतार:

**38.** पृथु:ख्यातिर्नर: केतुरित्याद्या दशसुता: कस्य मनो:?
(1) उत्तमस्य (2) तामसस्य (3) चाक्षुषस्य (4) स्वारोचिषस्य

**39.** हरिण्यां हरिमेधस: को जज्ञे?
(1) हरि: (2) हरीन्द्र: (3) हर्य्यक्ष: (4) हरिद्रुम:

**40.** त्रिकूटपर्वतस्य उच्छ्राय: कियानासीत्?
(1) अयुतयोजनम् (2) नियुतयोजनम् (3) प्रयुतयोजनम् (4) कोटियोजनम्

**41.** 'गिरिं गरिम्णा परित: प्रकम्पयन्' कमुद्दिश्य इयमुक्ति:?
(1) महेन्द्रमुद्दिश्य (2) दानवेन्द्रमुद्दिश्य (3) मानवेन्द्रमुद्दिश्य (4) गजेन्द्रमुद्दिश्य

**42.** 'करेणु:' इति पदस्य कोऽर्थ:?
(1) जलधूलि: (2) पराग: (3) हस्तिनी (4) खड्गी

**43.** पादपूर्त्तिर्विधेया--
स आत्ममूलोऽवतु मां ..................................।
(1) रमाधव: (2) सुमाधव: (3) परात्पर: (4) परेश्वर:

**44.** सर्वेन्द्रियगुणद्रष्टा सर्वप्रत्ययहेतुश्च क:?
(1) इन्द्र: (2) महादेव: (3) नारायण: (4) जीव:

**45.** गरुडस्य तात्त्विकं स्वरूपं किम्बुक्तं भागवते?
(1) मनोमयं (2) वायुरूपात्मकं (3) छन्दोमयं (4) विद्युन्मयम्

46. 'उस्रियाणाम्' इत्यस्य कोऽर्थ:?

(1) ऋषीणां (2) गन्धर्वाणां (3) देवानाम् (4) अप्सरसाम्

47. इन्द्रद्युम्न: कस्य देशस्यासीद् राजा?

(1) पाण्ड्यदेशस्य (2) गुर्जरदेशस्य (3) महाराष्ट्रस्य (4) बङ्गदेशस्य

48. किं कुर्वतांजनानां प्राणात्यये भगवान् विमलां मतिं ददाति?

(1) गजेन्द्रमोक्षस्तवस्य ब्राह्ममुहूर्तेपाठपरायणानाम् (2) सन्ध्यावन्दननिरतानाम्

(3) योगपरायणानाम् (4) याज्ञिकानाम्

49. अजितावतारस्य का माता आसीत्?

(1) आकूति: (2) प्रसूति: (3) सम्भूति: (4) देवहूति:

50. इन्द्रसहितास्त्रयो लोका: कस्य शापात् श्रीहीना अभवन्?

(1) अङ्गिरस: (2) दुर्वासस: (3) सुमेधस: (4) वेधस:

51. 'त्वय्यग्रआसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे।'
इत्यस्मिन् कथने 'इदम्ओट इति पदं कस्य कृते प्रयुक्तम्?

(1) विश्वप्रपञ्चस्य कृते (2) शरीरस्यकृते

(3) अन्त:करणस्य कृते (4) ज्ञानस्यकृते

52. 'न सरम्भेण सिद्ध्यन्ति सर्वेऽर्था: सान्त्वया यथा।'
इति कस्य कथनम्?

(1) ब्रह्मण: (2) शङ्करस्य (3) भगवतो नारायणस्य (4) इन्द्रस्य

53. समुद्रनिर्गतस्य महाविषस्य किन्नामासीत्?

(1) कालकल: (2) हालहल: (3) प्रज्वाल: (4) कीलाल:

**54.** शिवस्य पिबत: प्रस्कन्नं विषं के जगृहु:?

(1) वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे।

(2) भैरवादिगणा: सर्वे: डाकिन्यस्तरलास्तथा।

(3) रसातलगता नागा कूर्मरूपास्तथापर।।

(4) पिशाचा: प्रेतवैतालास्तालजङ्घादिनिश्चरा:

**55.** अमृतापूर्ण कलशं बिभ्रद्वलयभूषित:।
स वै भगवत: साक्षाद्विष्णोरंशांशसम्भव:।।
इत्यस्मिन्श्लोके क: परामृष्ट:?

(1) मत्स्यावतार: (2) धन्वन्तरि: (3) अजितावतार: (4) हरि:

**56.** छद्मदेवरूपधारिणो राहो: रहस्यं काभ्यां सूचितम्?

(1) अश्विनीकुमाराभ्याम् (2) मित्रावरुणाभ्याम्

(3) चन्द्रार्काभ्याम् (4) शनियमाभ्याम्

**57.** श्राद्धदेव: क:?

(1) विवस्वत: पुत्रो मनु: (2) धर्मस्य पुत्र:

(3) प्रजापते पुत्र: (4) बृहस्पते: पुत्र:

**58.** अष्टमे मन्वन्तरे समायाते को मनुर्भविता?

(1) सावर्णि: (2) धर्मसावर्णि: (3) रुद्रसावर्णि: (4) देवसावर्णि:

**59.** चित्रसेनविचित्राद्या: कस्य मनो: पुत्रा:?

(1) धर्मसावर्णे: (2) देवसावर्णे: (3) रुद्रसावर्णे: (4) सावर्णे:

**60.** कस्मिन्मन्वन्तरे शुचिरिन्द्रो भविष्यति?

(1) अष्टमे मन्वन्तरे (2) द्वादशतमे मन्वन्तरे

(3) त्रयोदशतमे मन्वन्तरे (4) चतुर्दशतमे मन्वन्तरे

**61.** अष्टमे स्कन्धे कः सर्वलघीयान् अध्यायः?

(1) द्वादशोध्यायः (2) त्रयोदशोऽध्यायः

(3) चतुर्दशोऽध्यायः (4) पञ्चदशोऽध्यायः

**62.** द्रविडेश्वरः क आसीत्?

(1) सत्यव्रतः (2) धर्मव्रतः (3) शुचिव्रतः (4) पुण्यव्रतः

**63.** इक्ष्वाकुप्रमुखा नृपाः कस्य पुत्रा आसन्?

*(1) वैवस्वतमनोः (2) चाक्षुषमनोः (3) तामसमनोः* (4) स्वायम्भुवमनोः

**64.** काऽऽसीत् श्रद्धा?

(1) मनोभावना (2) भक्तिः

(3) मनोःपत्नी (4) स्वर्गस्य काचन देवी

**65.** 'मासं पुमान्स भविता मासं स्त्री तव गोत्रजः।'

कमधिकृत्य एषा व्यवस्था कृता शङ्करेण भगवता?

(1) प्रद्युम्नमधिकृत्य (2) सुद्युम्नमधिकृत्य

(3) शतद्युम्नमधिकृत्य (4) सहस्रद्युम्नमधिकृत्य

**66.** पुरूरवसो राजधान्या नाम किमासीत्?

(1) हस्तिनापुरम् (2) खाण्डवप्रस्थम् (3) प्रतिष्ठानपुरम् (4) महोदयपुरम्

**67.** गोपालो गुरुणा कृतः, कः?

(1) उत्कलः (2) विमलः (3) गयः (4) पृषध्रः

**68.** कारुषाः के आसन्?

(1) ऋषयः (2) वन्यजातयः (3) ब्रह्मजातयः (4) क्षत्रजातयः

**69.** 'कानीन' इति को विख्यात:?

(1) जातूकर्ण्य: (2) कर्ण: (3) च्यवन: (4) उशना

**70.** कस्य यज्ञे इन्द्र: सोमपानेन अमाद्यत्?

(1) इन्द्रस्य (2) मरुत्तस्य (3) सुधृत्ते: (4) वैशालस्य

**71.** क: अङ्गिरसां सत्रे द्वितीयमह ऊचिवान्?

(1) कृशाश्व: (2) हेमचन्द्र: (3) शर्याति: (4) तृणबिन्दु:

**72.** शर्याते: कन्या का?

(1) कन्या (2) सुकन्या (3) देवकन्या (4) धर्मकन्या

**73.** कुशस्थली नाम नगरी कुत्र स्थिता आसीत्?

(1) समुद्रस्योपान्ते (2) हिमवतोऽधित्यकायाम्

(3) अन्त:समुद्रे (4) पुष्करद्वीपे

**74.** अङ्गिरसां सत्रे नाभागेन किं संशोधनं कृतम्?

(1) षष्ठं षष्ठमुपेत्य विस्मृतं वैश्वदेवसूक्तद्वयं शंसितम्

(2) विस्मृतं सोमाभिषवं स्मारितम्

(3) दक्षिणाविधानं व्यवस्थापितम्

(4) मन्त्राणामुच्चारणं संशोधितम्

**75.** 'ममेदं वास्तुकं वसु' इति केनोक्तम्?

(1) कृष्णदर्शनेन पुरुषेण (2) शुक्लदर्शनेन पुरुषेण

(3) पिङ्गलदर्शनेन पुरुषेण (4) लोहितदर्शनेन पुरुषेण

**76.** कस्य पुत्र आसीद् भगवद्भक्तोऽम्बरीष:?

(1) नभगस्य (2) नाभागस्य (3) यज्ञसेनस्य (4) वृषषेणस्य

**77.** श्लोकपूर्त्तिविधेया--

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज।

...................... भक्तैर्भक्तजनप्रियः॥

(1) ज्ञानिनामेकमाराध्यः (2) साधुभिर्ग्रस्तहृदयः

(3) कविभिःसन्तुतो नित्यं (4) याज्ञिकैः क्रतुभिः स्विष्टः

**78.** पतिदेवताः' इति पदस्य कोऽर्थः?

(1) पतिर्देवता यासां पत्नीनां ताः पत्न्यः (2) पत्युर्देवता याः पत्न्यस्ताः

(3) पतिश्च देवता चेति (4) पत्युःदेवताः

**79.** कस्येयमुक्तिः?

अश्वोऽयं नीयतां वत्स पितामहपशुस्तव।

इमे च पितरो दग्धा गङ्गाम्भोऽर्हन्ति नेतरत्॥

(1) गौतमस्य (2) याज्ञवल्क्यस्य (3) कपिलस्य (4) त्रितस्य

**80.** कल्माषपाद इति कस्यासीदपरं नाम?

(1) सौदासस्य (2) भगीरथस्य (3) अंशुमतः (4) ऋतुपर्णस्य

**81.** ''नारीकवच' इति कस्यापरं नाम?

(1) मूलकस्य (2) अश्मकस्य (3) दशरथस्य (4) विश्वसहस्य

**82.** नवमस्कन्धे कयोरध्याययोरस्ति श्रीरामचरितस्य वर्णनम्?

(1) दशमैकादशयोः (2) एकादशद्वादशयोः

(3) द्वादशत्रयोदशयोः (4) चतुर्दशपञ्चदशयोः

**83.** श्रीमद्भागवतनवमस्कन्धवर्णितपद्धत्या रघुः कस्य पुत्रः?

(1) खट्वाङ्गस्य (2) दीघबाहोः (3) दिलीपस्य (4) पृथुश्रवसः

**84.** पादपूर्त्तिर्विधेया--

"............................ व्यचरदनुवनं पद्मपद्भ्यां प्रियाया:"।

(1) सानन्दं सानुजो य: (2) देवार्थं मुक्तराज्यो
(3) गुर्वर्थे त्यक्तराज्यो (4) गुर्वर्थे भुक्तराज्यो

**85.** सीतास्वयंवरगृहे शिवस्य धनु: कियद्भिर्जनैरानीतम्?

(1) पञ्चाशज्जनै: (2) शतसङ्ख्याकैर्जनै:
(3) त्रिशतसङ्ख्याकैर्जनै: (4) पञ्चशतमितजनै:

**86.** कोदण्डपाणिरिति कस्य विशेषणम्?

(1) सुधन्वन: (2) मयूरध्वजस्य (3) श्रीरामस्य (4) महेन्द्रस्य

**87.** "सिन्धु: शिरस्यर्हणं परिगृह्य रूपी" इत्यत्र 'रूपी' ति पदस्य कोऽर्थ:?

(1) सुरूपवान् (2) शरीरी (3) रजतमय: (4) एतन्नामक:

**88.** 'बध्नीहि सेतुमिह ते यशसो वितत्यै इति कस्यासीत्कथनम्?

(1) इन्द्रस्य (2) अगस्त्यस्य (3) समुद्रस्य (4) शिवस्य

**89.** 'साम्परायिकम्' इति शब्दस्य कोऽर्थ:?

(1) सम्प्रतिकालिकम् (2) सम्प्राप्तिकालिकम्
(3) प्रकर्षितान्वितम् (4) और्ध्वदैहिकम्

**90.** कुशो लव इति ख्यातौ कौ?

(1) शष्पविशेषस्तस्य च लघु खण्ड: (2) विश्वामित्रपूर्वजौ
(3) सीताया: पुत्रौ (4) पावर्त्या: पुत्रौ

**91.** इक्ष्वाकूणां वंश: कं राजानमुपगत्य समाप्तिमेष्यतीतिप्राह श्रीशुक:?

(1) अग्निवर्णं (2) सुमित्रं (3) सिद्धसेनम् (4) अजमीढम्

**92.** ह्रस्वरोम्ण: पुत्रस्य किमासीन्नाम?

(1) सीरध्वज: (2) कृतध्वज: (3) मितध्वज: (4) खाण्डिक्य:

**93.** के राजानो गृहेष्वपि द्वन्द्वमुक्ता निरूपिता: श्रीमद्भागवतकारेण भगवता?

(1) राघवा: (2) मैथिला (3) कुरव: (4) यादवा:

**94.** का मित्रावरुणयो: शापान्नरलोकताम् आपन्ना?

(1) मेनका (2) तिलोत्तमा (3) उर्वशी (4) अलम्बुषा

**95.** कस्य राज्ञो वधो ब्रह्मवधादपि गरीयान् कथित:?

(1) सत्पुत्रयुक्तस्य (2) यज्ञदीक्षितस्य

(3) मृगयानिरतस्य (4) मूर्धाभिषिक्तस्य

**96.** कं गन्धर्वराजं पश्यन्ती रेणुका स्वपत्युर्होमवेलां न सस्मार?

(1) चित्रसेनम् (2) चित्ररथम् (3) चित्रतुरगम् (4) चित्रध्वजम्

**97.** षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च को राजा पृथ्वीं बुभुजे?

(1) श्रीराम: (2) युधिष्ठिर: (3) अलर्क: (4) वीतिहोत्र:

**98.** नहुषस्य कत्यासन् पुत्रा:?

(1) चत्वार: (2) पञ्च (3) षट् (4) अष्टौ

**99.** यस्मिन्निदं विरचितं व्योम्नीव जलदावलि:।
नानेव भाति नाभाति स्वप्नमायामनोरथ:॥
अत्र 'इदम्' इति पदस्य कोऽभिप्राय:?

(1) विश्वम् (2) ज्ञानम् (3) क्रीडनकम् (4) नाटकम्

**100.** शर्मिष्ठाया: पितु: किमासीनन्नाम?

(1) वृषपर्वा (2) द्युमत्सेन: (3) प्रसेनजित् (4) उशना

**101.** केभ्य: केभ्यो देवेभ्योऽञ्जलिं कृत्वा हनुमान् लङ्कागमनार्थं मतिं चकार?

(1) सूर्याय महेन्द्राय पवनाय स्वयम्भुवे च

(2) वरुणाय विश्वकर्मणे कुबेराय च

(3) यज्ञपुरुषायगन्धर्वराजाराय लोकपालाय च

(4) अग्नये मतरिश्वने चन्द्राय च

**102.** समुद्रस्य प्रेरणया क: पर्वतो हनुमत्सेवार्थं जलादुपरि समुत्थित:?

(1) त्रिकूट: (2) मन्दर: (3) मैनाक: (4) सह्यगिरि:

**103.** "प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरा" इति कस्योक्ति:?

(1) सुग्रीवस्य (2) समुद्रस्य (3) मैनाकस्य (4) हनूमत:

**104.** कीदृशीं लङ्कां ददर्श हनुमान्?

(1) अमरावतीमिव (2) विभावरीमिव (3) भोगावतीमिव (4) पुष्पवहामिव

**105.** हनूमता समुद्रोल्लङ्घनप्रसङ्गे कति योजनानि तीर्णानि?

(1) योजनानां शतं (2) योजनानां शतद्वयं

(3) योजनानां शतत्रयं (4) पञ्चाशद् योजनम्

**106.** 'कस्त्वं केन च कार्येण इह प्राप्तो वनालय।' इति कयोक्तं हनूमन्तं प्रति?

(1) छायाग्राहिण्या (2) सुरसया (3) लङ्कया (4) त्रिजटया

**107.** हंसो यथा राजतपञ्जरस्थ: सिंहो यथा मन्दरकन्दरस्थ: वीरो यथा गर्वितकुञ्जरस्थस्तथा क: कुत्रस्थो बभ्राज?

(1) सीतापति:काञ्चनस्यन्दनस्थ: (2) दृप्तोदशास्य: खलमण्डलस्थ:

(3) चन्द्रोऽम्बरस्थ: (4) रबिरम्बरस्थ:

**108.** विचित्रकूटं गिरे: शिरवरं यथा तथा रावणगृहे कं दृष्टवान् हनुमान्?

(1) त्रिकूटपर्वतम् (2) चित्रकूटपर्वतम् (3) पुष्पकम् (4) चन्द्रहासम्

**109.** 'धूर्तानिव महाधूर्त्तैर्देवनेन पराजितान्।'

इत्यत्र 'देवनेन' इति शब्दस्य कोऽभिप्राय:?

(1) देवविशेषेण (2) देवयाजकेन (3) विलापेन (4) द्यूतेन

**110.** स्त्रीभि: परिवृतस्ताराभिरिवोडुपति: क: शुशुभे?

(1) देवेन्द्र: (2) राक्षसाधिप: (3) वानराधिप: (4) सेनप:

**111.** 'व्याविद्धरशनादामा: किशोर्य इव वाहिता:।'

इत्यत्र किशोरीति पदस्य कोऽभिप्राय:?

(1) किशोरवय: प्राप्ता स्त्री (2) काचिन्निशाचरी

(3) अश्वा (4) वनचरी

**112.** का: सुप्ता, नद्य इवाबभु:?

(1) अप्सरस: (2) रावणान्त:पुरसुन्दर्य:

(3) अशोकवनिकाया उदानपालिका: (4) सुग्रीवान्त:पुरस्था: सुन्दर्य:

**113.** कस्य कृते महर्षिणा वाल्मीकिना--

माषराशिप्रतीकाशं नि:श्वसन्तं भुजङ्गवत्।

गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम्॥

इत्युक्ति: प्रयुक्ता?

(1) दशग्रीवस्य कृते (2) मेघनादस्यकृते

(3) कुम्भकर्णस्य कृते (4) विभीषणस्य कृते

**114.** 'शशक्षतजकल्पेन' इति विशेषणस्य कोऽर्थ:?

(1) चन्द्रस्वरूपेण (2) शशकरूपेण

(3) शशकरक्तोपमेन (4) कुङ्कुमसदृशेण

**115.** स्त्रीवीक्षणेन को महतीं धर्मसाध्वसशङ्कां जगाम?

(1) अङ्गद: (2) हनुमान् (3) सुग्रीव: (4) विभीषण:

**116.** सर्वेन्द्रियाणां शुभाशुभकार्येषु प्रवर्त्तने को हेतु:?

(1) अज्ञानम् (2) अहङ्कार: (3) बुद्धि: (4) मन:

**117.** मृगीषु परिमार्गितुं का न शक्या?

(1) मृगी (2) हरिणी (3) कृष्णशारवधू (4) प्रमदा

**118.** 'ध्रुवं प्रायमुपासिष्ये' इति हनुमत्कथनस्य कोऽभिप्राय:?

(1) उपासनं करिष्यामि (2) प्राणान्तं यावदुपोषणं करिष्यामि

(3) प्रायोनामव्रतमाचरिष्यामि (4) न किमपि करिष्यामि

**119.** 'रूमा' इति कस्या नाम?

(1) सुग्रीवपत्न्या: (2) विभीषणपत्न्या: (3) अङ्गदमातु: (4) नीलमातृश्वसु:

**120.** 'तरस्विन:' इत्यस्य कोऽर्थ:?

(1) बलशालिन: (2) वेगशालिन: (3) बुद्धिशालिन: (4) क्रीडाशालिन:

**121.** क: भद्रकं प्राप्नोति ?

(1) जीवन् (2) पश्यन् (3) गच्छन् (4) तिष्ठन्

**122.** 'प्रत्याचीर्णं भविष्यति' इति कथनस्य कोऽभिप्राय:?

(1) वैरस्य निष्कृतिर्भविष्यति (2) वैरस्य शान्तिर्भविष्यति

(3) वैरस्य फलप्राप्तिर्भविष्यति (4) वैरस्य वृद्धिर्भविष्यति

**123.** 'भगवानपि विश्वात्मा नातिक्षोभं प्रवायति।' इति कमुद्दिश्य प्रोक्तं हनुमता?

(1) इन्द्रमुद्दिश्य (2) वायुमुद्दिश्य (3) वरुणमुद्दिश्य (4) उपेन्द्रमुद्दिश्य

**124.** हनुमान् कीदृशीं सीतां ददर्श अशोकवनिकायाम्?

(1) अम्बरस्थां घनमालामिव (2) घनमालास्थितां दामिनीमिव

(3) शुक्लपक्षादौचन्द्ररेखामिव (4) जलधारामिव

**125.** आम्नायानामयोगेन प्रशिथिलामिव विद्यां हनूमत; का सन्दिदिहे?

(1) गतिः (2) कृतिः (3) बुद्धिः (4) स्थितिः

**126.** संस्कारेण हीना वाक् कीदृशी भवति?

(1) विशृङ्खलाभवति (2) निरर्गला भवति
(3) अथान्तरं गच्छति (4) व्याकरणान्तरं गच्छति

**127.** सीतायाः कृते श्रीरामश्चतुर्भिः कारणैस्तप्यते, कानि तानि?

(1) कारुण्यानृशंस्यशोकमदनानि (2) प्रेमविभ्रमसौहार्दपूज्यत्वानि
(3) शोकमोहदैन्यकार्पण्यानि (4) स्नेहसौख्यसहानुभवविभवानि

**128.** 'गुरुविनीतस्य' इति शब्दस्य कोऽभिप्रायः?

(1) गुरूणापोषितस्य (2) गुरुभिः शिक्षितस्य
(3) गुरुभिःविशेषेण नीतस्य (4) गुरुणा पालितस्य

**129.** हनुमान् सीतां दृष्ट्वा कं लेभे?

(1) महद्दुःखानुभवं (2) अतुलप्रहर्षम् (3) अमर्षम् (4) तर्षम्

**130.** षडङ्गवेदविद्वांसः के क्रतुप्रवरयाजिनः वर्णिताः सुन्दरकाण्डे?

(1) ऋषयः (2) मुनयः (3) देवाः (4) ब्रह्मरक्षसः

**131.** विद्युल्लता इव घनं, काः कमनुजग्मुः?

(1) रावणं, रावणस्त्रियः (2) सुग्रीवं, तद्वराङ्गनाः
(3) विभीषणं, तदाराध्याः (4) राघवं, मिथिलाङ्गनाः

**132.** 'विधिस्तव वधार्थाय विहितो नात्रसंशयः।'' इति कस्योक्तिः?

(1) सीतायाः (2) मन्दोदर्याः (3) त्रिजटायाः (4) माल्यवतः

**133.** श्मशानचैत्यप्रतिमो रावण: कीदृश: प्रत्यभात्?

(1) दुर्दान्तो दुरासद: (2) प्रभूतभयवर्द्धन:

(3) भूषितोऽपि भयङ्कर: (4) अपवित्रो जुगुप्सित:

**134.** मया क्रीड महाराज सीतया किं तवानया ?

इति कयोक्तो रावण:?

(1) अतिमात्रास्य नेत्रया (2) अतिमात्रकुचोदर्या

(3) धान्यमात्रान्या (4) बभ्रुनेत्रया

**135.** षण्णां प्रजापतीनां कश्चतुर्थ: प्रजापति:?

(1) मरीचि: (2) अत्रि: (3) पुलह: (4) पुलस्त्य:

**136.** मृगी कोकैरिवार्दिता?

इत्यत्र 'कोक' शब्दस्य क: प्रासङ्गिकोऽर्थ:?

(1) पक्षिविशेष: (2) वृक: (3) सिंह: (4) शृगाल:

**137.** विगर्हितं रावणं किं कर्त्तुं न वाञ्छति स्म सीता?

(1) सव्येन चरणेनापि स्प्रष्टुम् (2) चक्षुर्भ्यामवलोकयितुम्

(3) संवदितुम् (4) विवदितुम्

**138.** कया राक्षस्या दारुण: स्वप्नो दृष्ट आसीत्?

(1) सिंहमुख्या (2) घनमालया (3) एकजटया (4) त्रिजटया

**139.** स्वप्ने क: श्वेतच्छत्रो दृष्टस्तया?

(1) माल्यवान् (2) सुग्रीव: (3) विभीषण: (4) प्रहस्त:

**140.** 'रावणं मन्यमाना मां सीता भीता भविष्यति?' कदा?

(1) द्विजातिरिव संस्कृतभाषणे (2) गन्धर्वजातिरिव प्राकृतभाषणे

(3) रक्षोजातिरिव पैशाचीभाषणे (4) मनुष्यजातिरिवलोकभाषाभाषणे

**141.** के कार्याणि घातयन्ति?

(1) सुहृद: स्नेहशालिन: (2) सम्बन्धहतचेतना:

(3) दूता: पण्डितमानिन: (4) प्रवीणा: धूर्तसङ्गता:

**142.** 'काकुत्स्थ:' इत्यस्य कोऽभिप्राय:?

(1) ककुदि भव: (2) श्रीराम: (3) ककुद्देशोद्भव: (4) सुग्रीव:

**143.** सीतया किं विषसम्पृक्तममृतमित्यनुभूतम्?

(1) यच्च नो रावणं हन्तुं राम उत्सहते प्रभु:

(2) यच्च विस्मृत्य मां रामो कानने वसति ध्रुवम्

(3) यच्च नान्यमना रामो यच्च शोकपरायण:

(4) यच्च नाद्यापि लङ्कायामागतो रघुनन्दन:

**144.** नृशंसेन रावणेन सीताया: कृते कियन्मासात्मक: समय: कृत:?

(1) मासद्वयात्मक (2) मासत्रयात्मक:

(3) षण्मासात्मक: (4) एकमासात्मक:

**145.** सीताया: समक्षं को मेरुमन्दरसङ्काशो बभौ?

(1) सुग्रीव: (2) अङ्गद: (3) हनुमान् (4) मैन्द:

**146.** युद्धे कयोरनिश्चयो भवति?

(1) प्राप्ताप्राप्तयो: (2) अधिगतानधिगतयो:

(3) जयपराजययो: (4) स्नेहवैरयो:

**147.** भर्तृभक्तिं पुरस्कृत्य किं कर्तुं नैच्छद्भगवती सीता?

(1) स्वत:गन्तुम् (2) परपुरुषस्य स्वतोगात्रं स्प्रष्टुम्

(3) भोक्तुम् (4) आलपितुम्

**148.** पादपूर्तिर्विधेया--

ऊर्ध्वं मासान्न जीवेयं..........................।

(1) नागमिष्यति चेद्भवान्
(2) यदि त्वं नागमिष्यसि
(3) विना त्वां रघुपुङ्गव
(4) सत्येनाहं ब्रवीमि ते

**149.** को वाच्यावाच्यं न विजानाति?

(1) मूर्खः (2) कामाविष्टः (3) प्रकुपितः (4) चौरः

**150.** सागरलङ्घने के त्रयो जनाः समर्थाः?

(1) नीलो नलो द्विविदश्च
(2) हनुमान् गरुडोवायुश्च
(3) मैनाकःप्रवर्षणः कैलासश्च
(4) प्रवेको विवेकोऽरुणश्च

# अभ्यर्थियों के लिए निर्देश

***(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)***

**1.** प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।

**2.** परीक्षा भवन में ***लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,*** लिखा या सादा कोई भी खुला कागज साथ में न लायें।

**3.** ***उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।***

**4.** अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।

**5.** ***उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।***

**6.** ***ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।***

**7.** ***उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।***

**8.** ***प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।***

**9.** प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।

**10.** ***ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।***

**11.** रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।

**12.** परीक्षा के उपरान्त *केवल **ओ एम आर उत्तर-पत्र*** परीक्षा भवन में जमा कर दें।

**13.** परीक्षा समाप्त होने से पहले परीक्षा भवन से बाहर जाने की अनुमति नहीं होगी।

**14.** यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।